# MH SET

## Previous Year Paper

## (Sanskrit)

## 07 Apr, 2024

# Test Prime

***ALL EXAMS, ONE SUBSCRIPTION***

**70,000+** Mock Tests

Personalised Report Card

Unlimited Re-Attempt

**600+** Exam Covered

Previous Year Papers

**500%** Refund

IBPS

NABARD

**ATTEMPT FREE MOCK NOW**

Adda247

GET IT ON Google Play

Test Booklet Code & Serial No.
प्रश्नपत्रिका कोड व क्रमांक **A**

# Paper-II
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) ........................................
   (Name) ................................................
2. (Signature) ........................................
   (Name) ................................................

Seat No. | | | | | | | |
(In figures as in Admit Card)

Seat No. ...........................................................
(In words)

OMR Sheet No. | | | | | | | |
(To be filled by the Candidate)

## APR - 04224

**Time Allowed : 2 Hours]** **[Maximum Marks : 200**

Number of Pages in this Booklet : **20** Number of Questions in this Booklet : **100**

**Instructions for the Candidates**

1. Write your Seat No. and OMR Sheet No. in the space provided on the top of this page.
2. This paper consists of **100** objective type questions. Each question will carry *two* marks. *All* questions of Paper II will be compulsory.
3. At the commencement of examination, the question booklet will be given to the student. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as follows :
   (*i*) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal or open booklet.
   (*ii*) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to missing pages/questions or questions repeated or not in serial order or any other discrepancy should not be accepted and correct booklet should be obtained from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given. The same may please be noted.
   (*iii*) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each question has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** where (C) is the correct response.
   (A) (B) ● (D)
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done at the end of this booklet.
8. If you write your Name, Seat Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry the Test Booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. Use only Blue/Black Ball point pen.
11. Use of any calculator or log table, etc., is prohibited.
12. There is no negative marking for incorrect answers.

**विद्यार्थ्यांसाठी महत्त्वाच्या सूचना**

1. परीक्षार्थींनी आपला आसन क्रमांक या पृष्ठावरील वरच्या कोपऱ्यात लिहावा. तसेच आपणांस दिलेल्या उत्तरपत्रिकेचा क्रमांक त्याखाली लिहावा.
2. सदर प्रश्नपत्रिकेत 100 बहुपर्यायी प्रश्न आहेत. प्रत्येक प्रश्नास **दोन** गुण आहेत. या प्रश्नपत्रिकेतील **सर्व** प्रश्न सोडविणे अनिवार्य आहे.
3. परीक्षा सुरू झाल्यावर विद्यार्थ्याला प्रश्नपत्रिका दिली जाईल. सुरुवातीच्या 5 मिनिटांमध्ये आपण सदर प्रश्नपत्रिका उघडून खालील बाबी अवश्य तपासून पहाव्यात.
   (*i*) प्रश्नपत्रिका उघडण्यासाठी प्रश्नपत्रिकेवर लावलेले सील उघडावे. सील नसलेली किंवा सील उघडलेली प्रश्नपत्रिका स्वीकारू नये.
   (*ii*) पहिल्या पृष्ठावर नमूद केल्याप्रमाणे प्रश्नपत्रिकेची एकूण पृष्ठे तसेच प्रश्नपत्रिकेतील एकूण प्रश्नांची संख्या पडताळून पहावी. पृष्ठे कमी असलेली/कमी प्रश्न असलेली/प्रश्नांचा चुकीचा क्रम असलेली किंवा इतर त्रुटी असलेली सदोष प्रश्नपत्रिका सुरुवातीच्या 5 मिनिटातच पर्यवेक्षकाला परत देऊन दुसरी प्रश्नपत्रिका मागवून घ्यावी. त्यानंतर प्रश्नपत्रिका बदलून मिळणार नाही तसेच वेळही वाढवून मिळणार नाही याची कृपया विद्यार्थ्यांनी नोंद घ्यावी.
   (*iii*) वरीलप्रमाणे सर्व पडताळून पाहिल्यानंतरच प्रश्नपत्रिकेवर ओ.एम.आर. उत्तरपत्रिकेचा नंबर लिहावा.
4. प्रत्येक प्रश्नासाठी (A), (B), (C) आणि (D) अशी चार विकल्प उत्तरे दिली आहेत. त्यातील योग्य उत्तराचा रकाना खाली दर्शविल्याप्रमाणे ठळकपणे काळा/निळा करावा.
   **उदा. :** जर (C) हे योग्य उत्तर असेल तर.
   (A) (B) ● (D)
5. या प्रश्नपत्रिकेतील प्रश्नांची उत्तरे **ओ.एम.आर. उत्तरपत्रिकेतच दर्शवावीत.** इतर ठिकाणी लिहिलेली उत्तरे तपासली जाणार नाहीत.
6. आत दिलेल्या सूचना काळजीपूर्वक वाचाव्यात.
7. प्रश्नपत्रिकेच्या शेवटी जोडलेल्या कोऱ्या पानावरच कच्चे काम करावे.
8. जर आपण ओ.एम.आर. वर नमूद केलेल्या ठिकाणाव्यतिरिक्त इतर कोठेही नाव, आसन क्रमांक, फोन नंबर किंवा ओळख पटेल अशी कोणतीही खूण केलेली आढळून आल्यास अथवा असभ्य भाषेचा वापर किंवा इतर गैरमार्गांचा अवलंब केल्यास विद्यार्थ्याला परीक्षेस अपात्र ठरविण्यात येईल.
9. परीक्षा संपल्यानंतर विद्यार्थ्याने मूळ ओ.एम.आर. उत्तरपत्रिका पर्यवेक्षकांकडे परत करणे आवश्यक आहे. तथापि, प्रश्नपत्रिका व ओ.एम.आर. उत्तरपत्रिकेची द्वितीय प्रत आपल्याबरोबर नेण्यास विद्यार्थ्यांना परवानगी आहे.
10. फक्त निळ्या किंवा काळ्या बॉल पेनचाच वापर करावा.
11. कॅलक्युलेटर किंवा लॉग टेबल वापरण्यास परवानगी नाही.
12. चुकीच्या उत्तरासाठी गुण कपात केली जाणार नाही.

Adda247 GET IT ON Google Play

APR - 04224/II—A

# Sanskrit
## Paper II
# संस्कृत
## प्रश्नपत्रिका II

**Time Allowed : 120 Minutes]** **[Maximum Marks : 200**

**Note :** This Paper contains **Hundred (100)** multiple choice questions. Each question carrying **Two (2)** marks. Attempt *All* questions.

**सूचना :** या प्रश्नपत्रिकेत एकूण **शंभर (100)** बहुपर्यायी प्रश्न दिलेले आहेत. प्रत्येक प्रश्नाला **दोन (2)** गुण आहेत. **सर्व** प्रश्न सोडवा.

1. काशिकावृत्तेः प्रणेतारौ कौ ?

(A) नागेशकैय्यटौ

(B) वामनजयादित्यौ

(C) कात्यायनहेमचन्द्रौ

(D) जैनेन्द्रशाकटायनौ

2. षड्भावविकारमध्ये नास्ति .................. ।

(A) अस्ति

(B) विपरिणमते

(C) अपक्षीयते

(D) प्रागभावः

3. संस्कृतभाषा कस्मिन् भाषावर्गे समावेशमर्हति ?

(A) अयोगात्मकवर्गे

(B) योगात्मकवर्गे

(C) विभक्तिमुक्तवर्गे

(D) विभक्तियुक्तवर्गे

4. मेलनं कुरुत।

| | |
|---|---|
| (*a*) तालुः | (*i*) पकारः |
| (*b*) कण्ठः | (*ii*) अकारः |
| (*c*) ओष्ठौ | (*iii*) णकारः |
| (*d*) नासिका | (*iv*) जकारः |

| | (*a*) | (*b*) | (*c*) | (*d*) |
|---|---|---|---|---|
| (A) | (*ii*) | (*iii*) | (*iv*) | (*i*) |
| (B) | (*ii*) | (*iv*) | (*iii*) | (*i*) |
| (C) | (*ii*) | (*i*) | (*iv*) | (*iii*) |
| (D) | (*iv*) | (*ii*) | (*i*) | (*iii*) |

Adda247 GET IT ON Google Play



5. यकारस्य प्रयत्नः ............ अस्ति। (रिक्तस्थानं पूरयत)

(A) अस्पृष्टः

(B) स्पृष्टः

(C) ईषत्स्पृष्टः

(D) ईषद्विवृतः

6. अधोनिर्दिष्ट विधानानां सत्यासत्यत्वं चिनुत।

(*a*) सिंहली इति युरोभारतीया भाषा अस्ति।

(*b*) वाक्यपदीयस्य रचयिता नागेशः नास्ति।

(*c*) शकारस्य उच्चारणस्थानं मूर्धा अस्ति।

(*d*) कात्यायनः पतञ्जलेः पूर्ववर्ती अस्ति।

(A) सत्यं, असत्यं, सत्यं, सत्यम्

(B) असत्यं, सत्यं, असत्यं, सत्यम्

(C) सत्यं, सत्यं, असत्यम्, असत्यम्

(D) सत्यं, सत्यम्, असत्यं, सत्यम्

7. युग्ममेलनं कुरुत।

(*a*) कैय्यटः (*i*) उद्योतः

(*b*) नागोजीभट्टः (*ii*) प्रदीपः

(*c*) वामनः (*iii*) ब्रह्मकाण्डम्

(*d*) भर्तृहरिः (*iv*) काशिकावृत्तिः

| | (*a*) | (*b*) | (*c*) | (*d*) |
|---|---|---|---|---|
| (A) | (*iii*) | (*i*) | (*iv*) | (*ii*) |
| (B) | (*ii*) | (*i*) | (*iv*) | (*iii*) |
| (C) | (*ii*) | (*iv*) | (*i*) | (*iii*) |
| (D) | (*i*) | (*ii*) | (*iii*) | (*iv*) |

8. 'दधामि' इत्यत्र धवर्णस्य दवर्णे परिवर्तनं कस्य ध्वनिनियमानुगुणं भवति ?

(A) ग्रीमस्य

(B) वेर्नरस्य

(C) ग्रासमानस्य

(D) मॅक्समूलरस्य

Adda247 GET IT ON Google Play



9. संस्कृतभाषायां पशुमात्रे प्रयुक्तः मृगशब्दः ............. हरिण इति मराठीभाषायां रूढतां गतः। (रिक्तस्थानं पूरयत)

(A) अर्थविस्तारवशाद

(B) अर्थसंकोचवशाद्

(C) अर्थपरिवर्तनवशाद्

(D) अर्थसंक्रमणवशाद्

10. 'शि' इत्यस्य का संज्ञा भवति ?

(A) सर्वनामस्थानसंज्ञा

(B) गतिसंज्ञा

(C) सवर्णसंज्ञा

(D) टिसंज्ञा

11. प्रगृह्यसंज्ञा कस्य भवति ?

(A) इद्द्विवचनस्य

(B) उद्द्विवचनस्य

(C) ओद्द्विवचनस्य

(D) ईदूदेद्द्विवचनस्य

12. आकारस्य का संज्ञा भवति ?

(A) वृद्धिसंज्ञा

(B) गुणसंज्ञा

(C) घसंज्ञा

(D) घुसंज्ञा

13. अन्त्यादलः पूर्ववर्णस्य का संज्ञा भवति ?

(A) अपृक्तसंज्ञा

(B) घुसंज्ञा

(C) उपधासंज्ञा

(D) नदीसंज्ञा

14. 'मृद्वी' इति रूपे कः प्रत्ययः विहितः ?

(A) ङीप्

(B) ङीष्

(C) ङीन्

(D) क्तिन्



Adda247

Adda247 GET IT ON Google Play



15. महाभाष्यकारमते विद्या कतिधा उपयुक्ता भवति ?

(A) त्रिविधा

(B) द्विधा

(C) चतुर्धा

(D) पञ्चधा

16. सिद्धे शब्दार्थसम्बन्धे इत्यत्र सिद्धशब्दो भाष्यकारमते कस्मिन्नर्थे प्रयुक्त: ?

(A) मङ्गलार्थे नित्यार्थे च

(B) मङ्गलार्थे अनित्यार्थे च

(C) केवलं मङ्गलार्थे

(D) केवलं नित्यार्थे

17. स्थूलपृषतीमनड्वाहीम् इत्यत्र स्थूलपृषती इत्यस्मिन् शब्दे क: समासोऽभीष्ट: ?

(A) अव्ययीभाव:

(B) बहुव्रीहि:

(C) तत्पुरुष:

(D) द्वन्द्व:

18. 'शार्ङ्गरवी' इत्यत्र क: प्रत्यय: विहित: ?

(A) ङीप्

(B) ङीष्

(C) ङीन्

(D) ति:

19. वाक्यपदीयस्य (ब्रह्मकाण्डस्य) रचयिता क: ?

(A) पाणिनि:

(B) पतञ्जलि:

(C) कौण्डभट्ट:

(D) भर्तृहरि:

20. 'दध्ना जुहोति' इति को विधि: ?

(A) उत्पत्तिविधि:

(B) विनियोगविधि:

(C) अधिकारविधि:

(D) विशिष्टविधि:

Adda247
GET IT ON Google Play



21. अग्निहोत्रानुष्ठाने प्रथमाहुतिः कदा प्रदीयते ?

(A) प्रातः

(B) मध्याह्ने

(C) सायम्

(D) रात्रौ

22. दर्शपूर्णमासयागः कति दिनानि व्याप्य अनुष्ठीयते ?

(A) एकदिनम्

(B) द्वौ दिवसौ

(C) पक्षद्वयम्

(D) मासमेकम्

23. रक्तसंज्ञकाः वर्णाः भवन्ति—

(A) अनुनासिकाः

(B) अघोषाः

(C) घोषाः

(D) सोभाः

24. शून्यस्थानं पूरय-

भावप्रधानम् .............

(A) नाम

(B) आख्यातम्

(C) निपातः

(D) उपसर्गः

25. जानश्रुति-रैक्वसंवादः कस्यामुपनिषदि अस्ति ?

(A) कठोपनिषदि

(B) बृहदारण्यकोपनिषदि

(C) छन्दोग्योपनिषदि

(D) केनोपनिषदि

26. अर्थव्याख्यानमूळकं वेदाङ्गशास्त्रमस्ति ..........

(A) शिक्षा

(B) व्याकरणम्

(C) निरुक्तम्

(D) कल्पः

Adda247 GET IT ON Google Play



27. माक्सम्यूलरमते ऋग्वेदस्य रचनाकालः ........

(A) ख्रीष्टपूर्व-2000 शतकम्

(B) ख्रीष्टपूर्व-2500 शतकम्

(C) ख्रीष्टपूर्व-1200 शतकम्

(D) ख्रीष्टपूर्व-1000 शतकम्

28. 'यं क्रन्दसी अवसा तस्यमाने'-इत्यत्र 'क्रन्दसी' पदस्यार्थः सायणमते .......................

(A) क्रन्दनरता रमणी

(B) द्यावापृथिव्यौ

(C) उषोदेवी

(D) युद्धरता रमणी

29. 'यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश'- इति मन्त्रांशः प्राप्यते .......................

(A) केनोपनिषदि

(B) कठोपनिषदि

(C) ईशोपनिषदि

(D) श्वेताश्वतरोपनिषदि

30. यम-यमीसंवादसूक्तं हि उपलभ्यते ऋक्संहितायाः कस्मिन् मण्डले ?

(A) 10.90

(B) 10.10

(C) 10.89

(D) 10.91

31. गोपथब्राह्मणे प्रपाठकाः सन्ति ................

(A) अष्टौ

(B) नव

(C) दश

(D) एकादश

32. किं वेदाङ्गं वेदस्य घ्राणरूपं विद्यते ?

(A) शिक्षा

(B) व्याकरणम्

(C) कल्पः

(D) निरुक्तम्

Adda247 GET IT ON Google Play



33. ऋक्संहितायाः पदपाठकारोऽस्ति ..........।

(A) शाकल्यः

(B) शाकटायनः

(C) शौनकः

(D) गार्ग्यः

34. का राष्ट्री सङ्गमनी ?

(A) वाक्

(B) सिनीवाली

(C) राका

(D) अनुमतिः

35. कितवसूक्तस्य द्रष्टा कः ?

(A) गृत्समदः

(B) वसिष्ठः मैत्रावरुणिः

(C) कवषः ऐलूषः

(D) शुनःशेपः आजीगर्तिः

36. 'अनर्थकाः हि मन्त्राः' इति कस्य मतम् ?

(A) शाकपूणेः

(B) शाकटायनस्य

(C) कौत्सस्य

(D) कात्यायनस्य

37. मृगशीर्षनक्षत्रमधिकृत्य वेदानां कालनिश्चितिः केन कृता ?

(A) मॅक्सम्युलरमहोदयेन

(B) वेबरमहोदयेन

(C) तिलकमहोदयेन

(D) विन्टरनिट्झमहोदयेन

38. 'श्रेयो हि धीरोऽभिप्रेयसो वृणीते' इति कुत्र पठ्यते ?

(A) तैत्तिरीयोपनिषदि

(B) तैत्तिरीय-संहितायाम्

(C) कठोपनिषदि

(D) कठसंहितायाम्

Adda247 GET IT ON Google Play



39. सांख्यमते अनुमानं कतिविधम् उच्यते ?

(A) एकमेव

(B) द्विविधम्

(C) त्रिविधम्

(D) चतुर्विधम्

40. स्थूलोऽहं, कृशोऽहमिति कीदृशः अध्यासः ?

(A) इन्द्रियाध्यासः

(B) देहाध्यासः

(C) अन्तःकरणाध्यासः

(D) बाह्यधर्माध्यासः

41. पापक्षयसाधनानि चान्द्रायणादीनि …………… कर्माणि भवन्ति।

(A) उपासना

(B) काम्यानि

(C) प्रायश्चित्तानि

(D) नित्यानि

42. कालेन अनवच्छेदात् पूर्वेषामपि गुरुः उच्यते ……………………।

(A) पतञ्जलिः

(B) योगगुरुः

(C) ईश्वरः

(D) ऋषिः

43. शब्दसामर्थ्यं नाम किम् ?

(A) श्रुतिः

(B) स्थानम्

(C) लिङ्गम्

(D) प्रकरणम्

44. स्पर्शरसगन्धवर्णवन्तः ………………… भवन्ति।

(A) पुद्गलाः

(B) स्कन्धाः

(C) स्थावराः

(D) ऋषयः



Adda247

Adda247 GET IT ON Google Play



45. सांख्यमते अध्यवसायो नाम किम् ?

(A) बुद्धिः

(B) कर्म

(C) इन्द्रियाणि

(D) प्रकृतिः

46. बौद्धमते कति स्कन्धाः भवन्ति ?

(A) त्रयः

(B) पञ्च

(C) अष्टौ

(D) अनन्ताः

47. कण्ठस्थानीयः ऊर्ध्वगमनवान् उत्क्रमणवायुः कः ?

(A) प्राणः

(B) उदानः

(C) समानः

(D) व्यानः

48. अतद्रूपप्रतिष्ठं मिथ्याज्ञानं किमुच्यते ?

(A) विपर्ययः

(B) निद्रा

(C) प्रमाणम्

(D) स्मृतिः

49. गृहे प्रच्छन्न उत्पन्नो पुत्रः ..................

(A) औरसः

(B) क्षेत्रजः

(C) कानीनः

(D) गूढजः

50. अभियोगस्य अपह्नवे कियद् धनं राज्ञे दीयते ?

(A) द्विगुणम्

(B) त्रिगुणम्

(C) चतुर्गुणम्

(D) अभियोगसमम्



Adda247

Adda247 GET IT ON Google Play



51. पितृपितामहानमात्यान् कुर्वीत इति कस्य मतम् ?

(A) वातव्याधेः

(B) कौणपदन्तस्य

(C) कौटिल्यस्य

(D) भारद्वाजस्य

52. 'आचारः परमो धर्मः' इति मनुस्मृतेः कस्मिन् अध्याये लिखितम् ?

(A) प्रथमे

(B) द्वितीये

(C) चतुर्थे

(D) सप्तमे

53. अङ्गुलिमूले किं तीर्थं भवति ?

(A) ब्राह्मम्

(B) कायम्

(C) दैवम्

(D) पित्र्यम्

54. सर्वविद्यानाम् प्रदीपः ..............।

(रिक्तस्थानं पूरयत)

(A) त्रयी

(B) वार्ता

(C) आन्वीक्षिकी

(D) दण्डनीतिः

55. याज्ञवल्क्यस्मृतेरनुसारं लिखितं भुक्तिः साक्षिणश्चेति किम् ?

(A) प्रमाणम्

(B) प्रकरणम्

(C) अनुमानम्

(D) साधनम्

56. 'धर्मशास्त्रं तु वै स्मृतिः' इति कस्य वचनम् अस्ति ?

(A) याज्ञवल्क्यस्य

(B) मनोः

(C) कौटिल्यस्य

(D) शुक्राचार्यस्य

Adda247 GET IT ON Google Play



57. भितरी-स्तम्भलेखस्य का भाषा अस्ति ?

(A) हिन्दी

(B) संस्कृतम्

(C) प्राकृतम्

(D) पालि:

58. रुद्रदाम्न: शिलालेख: कुत्र विद्यते ?

(A) प्रयागे

(B) जूनागढे

(C) तक्षशिलायाम्

(D) पाटलिपुत्रे

59. ''नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्'' वाक्यमेतत् कुत्र वर्तते ?

(A) रघुवंशमहाकाव्ये

(B) नाट्यशास्त्रे

(C) मालविकाग्निमित्रनाटके

(D) शाकुन्तलनाटके

60. ''वरं विरोधोऽपि समं महात्मभि:'' कस्य कवेरियमुक्ति: ?

(A) कालिदासस्य

(B) भारवे:

(C) माघस्य

(D) वाल्मीके:

61. 'तुकारामचरितम्' इति महाकाव्यस्य रचयिता क: ?

(A) पण्डिता क्षमा राव:

(B) श्री. भा. वर्णेकर:

(C) सी. राघवन्

(D) जी. वी. पळसुळे

62. ''इदं कविभ्य: पूर्वेभ्यो नमोवाकं प्रशास्महे'' इतीदं वाक्यं कुत्र वर्तते ?

(A) महावीरचरिते

(B) उत्तररामचरिते

(C) मालतीमाधवे

(D) मेघदूते

Adda247 GET IT ON Google Play



63. पाश्चात्त्यसाहित्यशास्त्रे भाषाया: सौकुमार्यं (Loftiness) केन विदुषा स्वीकृतम् ?

(A) ॲरिस्टॉटल

(B) प्लाटो

(C) लोङ्गिनस

(D) क्रोचे

64. ॲरिस्टॉटल–महोदयेन पाश्चात्त्यसाहित्ये प्रतिपादित: सिद्धान्त: क: ?

(A) कॉमेडी

(B) ट्रॅजेडी

(C) कथार्सिस्

(D) रस:

65. 'मृच्छकटिकम्' इति कस्य रूपकस्योदाहरणम् ?

(A) नाटकस्य

(B) प्रकरणस्य

(C) व्यायोगस्य

(D) समवकारस्य

66. शिवराज्योदयम् इति काव्यं क: लिखितवान् ?

(A) पण्डिता क्षमा राव:

(B) अम्बिकादत्तव्यास:

(C) श्री. भा. वर्णेकर:

(D) वसंत: त्र्यंबक: शेवडे

67. 'सत्याग्रहगीता' इति काव्यस्य रचयिता क: ?

(A) महात्मागान्धि:

(B) श्री. भा. वर्णेकर:

(C) पण्डिता क्षमा राव:

(D) कालिदास:

68. "तात चन्द्रापीड! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमपि उपदेष्टव्यमस्ति" इतीदं वाक्यं शुकनासेन कस्मै प्रयुक्तम् ?

(A) चन्द्रापीडाय

(B) तारापीडाय

(C) बाणभट्टाय

(D) शूद्रकाय

Adda247 GET IT ON Google Play



69. "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः" इति व्याप्तिलक्षणे को दोषः ?

(A) पर्वतो वह्निमान् धूमादित्यत्र अव्याप्तिः

(B) धूमवान् वह्नेरित्यत्र अतिव्याप्तिः

(C) इदं वाच्यं ज्ञेयत्वादित्यत्र अव्याप्तिः

(D) द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्र अव्याप्तिः

70. द्रव्यं गुणकर्मान्यत्रविशिष्टसत्त्वादित्यत्र हेतुतावच्छेदकसम्बन्धः कः ?

(A) संयोगः

(B) समवायः

(C) स्वरूपसम्बन्धः

(D) तादात्म्यसम्बन्धः

71. रिक्तस्थानं पूरयत–

'सत्त्वरजस्तमसां साम्यावस्था ..............'।

(A) पुरुषः

(B) प्रकृतिः

(C) विकृतिः

(D) तुरीयः

72. रिक्तस्थानं पूरयत–

'तदा ............ स्वरूपेऽवस्थानम्।

(A) पापिनः

(B) आर्त्तस्य

(C) ईश्वरस्य

(D) द्रष्टुः

73. शाब्दभावनायाः अंशाः

(A) व्याप्यव्यापकभावः

(B) वाच्यवाचकभावः

(C) अभिधा लक्षणा व्यञ्जना च

(D) साध्यं साधनमिति कर्तव्यता च

74. रिक्तस्थानं पूरयत–

'................ शक्यसम्बन्धस्तात्पर्यानुपपत्तिः।'

(A) अभिधा

(B) लक्षणा

(C) व्यञ्जना

(D) विवक्षा

Adda247 GET IT ON Google Play



75. विशेषपदार्थे पुनः विशेषस्वीकारे का हानिः ?

(A) वितण्डा

(B) रूपहानिः

(C) असम्बन्धः

(D) जल्पम्

76. 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्'-इत्यत्र सन्निकर्षः कः ?

(A) मर्यादा

(B) व्यापारः

(C) फलम्

(D) विज्ञानम्

77. 'इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्' इति पङ्क्तिः कस्मिन् ग्रन्थे प्राप्यते ?

(A) वैयाकरणसिद्धान्तकौमुद्याम्

(B) न्यायसूत्रे

(C) वाक्यपदीयस्य ब्रह्मकाण्डे

(D) परिभाषेन्दु शेखरे

78. शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?

(A) संयोगाः

(B) समवेतसमवायः

(C) विशेषणता

(D) संयुक्तसमवायः

79. आचार्यमम्मटानुसारं सर्वसाधारणक्रियः, सर्वसमावेशकः गुणः कः ?

(A) प्रसादः

(B) ओजः

(C) माधुर्यम्

(D) समता

80. शिशुपालवधमहाकाव्यस्य सर्गसंख्या कति ?

(A) सप्तविंशतिः

(B) पञ्चविंशतिः

(C) एकविंशतिः

(D) विंशतिः

81. "कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्॥"

—अत्र कोऽलङ्कारः ?

(A) भ्रान्तिमान्

(B) उत्प्रेक्षा

(C) तुल्ययोगिता

(D) अतिशयोक्तिः

Adda247

Adda247 GET IT ON Google Play



82. शालिनीमालिन्योः कस्मिन् अंशे लघुगुरुसादृश्यम् अस्ति ?

(A) आदिमसप्ताक्षरेषु

(B) अन्तिमसप्ताक्षरेषु

(C) प्रथमसप्ताक्षरेषु

(D) मध्यमसप्ताक्षरेषु

83. ''निसर्गयुबोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः'' –इत्यत्र द्वौ क्वशब्दौ किं सूचयतः ?

(A) अविद्यमानत्वम्

(B) मददन्तरम्

(C) अलीकत्वम्

(D) स्थितिदेशभेदम्

84. अधोनिर्दिष्टेषु स्वरूपोत्प्रेक्षायाः उदाहरणं किम् ?

(A) धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्

(B) प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति

(C) त्वन्मुखाभेच्छया नूनं पद्मैर्वैशलते शशी

(D) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः

85. अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तथा–कया ?

(A) लक्षणया

(B) व्यञ्जनया

(C) तात्पर्यवृत्या

(D) अभिधया

86. 'सूरिभिः कथितः' इति विद्वदुपज्ञेयमुक्तिः''। अत्र विषये के तावत् आनन्दवर्धनमते प्रथमे विद्वांसः ?

(A) मीमांसकाः

(B) तार्किकाः

(C) कवयः

(D) वैयाकरणाः

87. 'सगुणावनलङ्कृती' इत्यत्र 'अनलङ्कृती' इत्यस्यार्थः कः ?

(A) न अलङ्कृती

(B) अविद्यमाना अलङ्कृतिः ययोः तौ

(C) अविद्यमाने अलङ्कृती

(D) अविद्यमानौ अलङ्कृती

Adda247 GET IT ON Google Play



88. ''इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः'' अत्र अतिशयक्त्व कस्य ?

(A) वाच्यार्थस्य

(B) व्यङ्ग्यार्थस्य

(C) लक्ष्यार्थस्य

(D) तात्पर्यार्थस्य

89. मनुस्मृतेः कस्मिन् अध्याये सृष्टिक्रमस्य वर्णनं कृतमस्ति ?

(A) द्वितीये

(B) प्रथमे

(C) तृतीये

(D) चतुर्थे

90. ............ याज्ञवल्क्यस्मृतेः अध्यायः नास्ति।

(A) आचाराध्यायः

(B) व्यवहाराध्यायः

(C) धर्माध्यायः

(D) प्रायश्चित्ताध्यायः

91. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते ?

(A) भीष्मपर्वणि

(B) उद्योगपर्वणि

(C) आदिपर्वणि

(D) वनपर्वणि

92. अशोकस्य अहरौरा-शिलालेख-संबद्ध-जनपदमस्ति :

(A) आगरा

(B) मिर्जापुरम्

(C) पुणे

(D) राजगिरिः

93. कस्यास्ति अफसद-शिलालेखः ?

(A) समुद्रगुप्तस्य

(B) आदित्यसेनस्य

(C) अशोकस्य

(D) ईशानवर्मणः

94. भूतमात्रेन्द्रियार्थानां सम्भवः पुराणलक्षणे किम् उच्यते ?

(A) सर्गः

(B) प्रतिसर्गः

(C) वंशः

(D) वंशानुचरितम्

Adda247

Adda247 GET IT ON Google Play



95. प्रतिसर्गः कतिविधः प्रोक्तः वर्तते ?

(A) द्विविधः

(B) त्रिविधः

(C) चतुर्विधः

(D) अनन्तः

96. सात्त्विकेषु पुराणेषु कस्य माहात्म्यम् अधिकं वर्ण्यते ?

(A) हरेः

(B) हरस्य

(C) देव्याः

(D) अग्नेः

97. सुग्रीवस्य पत्न्या नाम किम् ?

(A) उमा

(B) निमा

(C) रुमा

(D) सुषमा

98. यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् इति कस्योक्तिः वर्तते ?

(A) हनुमतः

(B) श्रीरामस्य

(C) रावणस्य

(D) सुग्रीवस्य

99. गां दोग्धि पयः इत्यत्र अकथितं कर्म किम् ?

(A) गामिति

(B) दोग्धि इति

(C) पयः इति

(D) गां दोग्धि इति

100. अचां मध्ये योऽन्त्यः स आदिर्यस्य समुदायस्य तस्य का संज्ञा भवति ?

(A) भसंज्ञा

(B) सर्वनामसंज्ञा

(C) अपृक्तसंज्ञा

(D) टिसंज्ञा

Adda247
GET IT ON Google Play



ROUGH WORK